# पुनरावृत्ति परीक्षा (रिविजन टेस्ट) 2020

कक्षा : नवमी (9वीं )

विषय :– संस्कृतम्

समय :– घण्टात्रयम् पूर्णाङ्काः 100

**प्रश्नः 1 उचितविकल्पं चित्वा लिखत –** **05**

(क) "वृक्षस्योपरि" पदे सन्धिः अस्ति –

(अ) गुणसन्धिः (ब) दीर्घसन्धिः

(स) वृद्धिसन्धिः (द) अयादिसन्धिः

(ख) "कक्षा+अभ्यन्तरः " इत्यस्य सन्धिपदम् अस्ति –

(अ) कक्षभ्यन्तरः (ब) कक्षाअभ्यन्तरः

(स) कक्षोभ्यन्तरः (द) कक्षाभ्यन्तरः

(ग) अधोलिखितेषु व्यञ्जनसन्धिः अस्ति –

(अ) तदनन्तरः (ब) पावकः

(स) कपीशः (द) इत्यादिः

(घ) "एकैकः" पदे सन्धिः अस्ति –

(अ) गुणसन्धिः (ब) दीर्घसन्धिः

(स) वृद्धिसन्धिः (द) अयादिसन्धिः

(ङ) "मनोहरः" पदस्य सन्धिविच्छेदः अस्ति –

(अ) मनः+हरः (ब) मनो+हरः

(स) मनस्+हरः (द) मन+हरः

**प्रश्नः 2 उचितविकल्पं चित्वा लिखत –** **04**

(क) "रोदितुम्'' इतिपदे प्रत्ययः अस्ति –

(अ) तव्यत् (ब) अनीयर्

(स) तुमुन् (द) शतृ

(ख) अधोलिखितेषु ''विलोक्य'' इति पदे प्रत्ययः अस्ति –

(अ) ल्यप् (ब) शतृ

(स) अनीयर् (द) शानच्

(ग) "शयित्वा" पदे प्रत्ययः अस्ति –

(अ) क्त्वा (ब) ल्यप्

(स) अनीयर् (द) शतृ

(घ) ''तमप्'' प्रत्ययः अस्ति –

(अ) प्रियतरः (ब) मधुरतमः

(स) गुरुतरम् (द) बलवत्तरः

**प्रश्नः 3 उचितविकल्पं चित्वा लिखत –** **05**

(क) "गच्छति" पदे लकारः अस्ति –

(अ) लट्लकारः (ब) लङ्लकारः

(स) लोट्लकारः (द) लृट्लकारः

(ख) "अवर्षत्" पदे लकारः अस्ति –

(अ) लट्लकारः (ब) लङ्लकारः

(स) लोट्लकारः (द) लृट्लकारः

(ग) "भवन्तु" पदे पुरुषः अस्ति –

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः

(स) उत्तमपुरुषः (द) नञ्तत्पुरुषः

(घ) "मन्यतेः" इत्यस्य पदमस्ति अस्ति –

(अ) परस्मैपदम् (ब) आत्मनेपदम्

(स) अन्यपदम्　　(द) उभयपदम्

(ङ) "लृट्लकारः" उदाहरणम् अस्ति –

(अ) पास्यति　　(ब) पश्यति

(स) लिखन्तु　　(द) क्रुध्यति

**प्रश्नः 4 उचितविकल्पं चित्वा लिखत – 04**

(क) अधोलिखितेषु तुमुन् प्रत्ययः अस्ति –

(अ) पठित्वा　　(ब) क्रीडितुम्

(स) हसितवान्　　(द) गतः

(ख) "दत्वा" पदे प्रत्ययः अस्ति –

(अ) त्वा　　(ब) क्त

(स) क्त्वा　　(द) ल्यप्

(ग) "क्तवतु" प्रत्ययस्य उदाहरणम् अस्ति –

(अ) कृतवान्　　(ब) खादितः

(स) कर्तुम्　　(द) हसित्वा

(घ) अधोलिखितेषु "शतृ" प्रत्ययः अस्ति –

(अ) खादितवान्　　(ब) सेवमानः

(स) पठन्　　(द) गमनीयम्

**प्रश्नः 5 श्लोकपंक्तिपूर्तिं कुरूत – 02**

1. प्रियवाक्यप्रदानेन ...................................।
2. गुणेष्वेव हि कर्तव्यः.................................।

**प्रश्नः 6 उदाहरणमनुसृत्य कोष्ठकगतेषु पदेषु पंचमीविभक्तेः प्रयोगं कृत्वा रिक्तस्थानानि पूरयत 05**

( यथा–मूषकः **बिलाद्** बहिः निर्गच्छति )

1. जनः.................बहिः आगच्छति। (ग्राम)
2. नद्यः ......................निस्सरति। (पर्वत)
3. बालकः.......................बिभेति। (सिंह)
4. ईश्वरः..............................त्रायते। (क्लेश)
5. प्रभुः भक्तं ......................निवारयति। (पाप)

**प्रश्नः 06 अधोलिखितप्रश्नानाम् उत्तराणि एकपदेन लिखत – 06**

1. कविः कां सम्बोधयति ?
2. स्वर्णकाकः कान् अखादत् ?
3. कुम्भकारः घटान् किमर्थं रचयति ?
4. जीमूतवाहनः कस्य पुत्रः आसीत् ?
5. वित्ततः क्षीणः कीदृशः भवति ?
6. कः तन्द्रालुः भवति ?

**प्रश्नः 7 अधोलिखितशब्दानां रूपाणि त्रिषु वचनेषु लिखत – 04**

1. बालक – पञ्चमी विभक्तिः
2. गुरु – द्वितीया विभक्तिः
3. शाला – चतुर्थी विभक्तिः
4. कवि – द्वितीया विभक्तिः

**प्रश्नः 8 अधोलिखितेषु गद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत – 10**

(1) पुरा कस्मिंश्चित् ग्रामे एका निर्धना वृद्धा स्त्री न्यवसत्। तस्याः च एका दुहिता विनम्रा मनोहरा चासीत्। एकदा माता स्थाल्यां तण्डुलान् निक्षिप्य पुत्रीम् आदिशत्। ''सूर्यातपे तण्डुलान् खगेभ्यो रक्ष।'' किञ्चित् कालानन्तरम् एको विचित्रः काकः समुड्डीय तस्याः समीपम् अगच्छत्।

(क) ग्रामे का अवसत् ?

(ख) दुहिता कीदृशी आसीत् ?

(ग) माता पुत्रीम् किम् आदिशत् ?

(घ) काकः कुत्र आगच्छत् ?

(ङ) कालानन्तरम् इत्यस्य सन्धिविग्रहं कृत्वा सन्धिनाम लिखत ?

(2) अस्ति हिमवान् नाम सर्वरत्नभूमिः नग्रेन्द्रः। तस्य सानोः उपरि विभाति कञ्चनपुरं नाम नगरम्। तत्र जीमूतकेतुः इति श्रीमान् विद्याधरपतिः वसति स्म। तस्य गृहोद्याने कुलक्रमागतः कल्पतरुः स्थितः। स राजा जीमुतकेतुः तं कल्पतरुम् आराध्य तत्प्रसादात् च बोधिसत्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत्।

(क) नगेन्द्रः कीदृशः अस्ति ?

(ख) कञ्चनपुरं कुत्र अस्ति ?

(ग) कञ्चनपुरनगरे कः वसति ?

(घ) जीमूतकेतोः गृहोद्याने कः स्थितः ?

(ङ) जीमूतवाहनस्य पिता कः ?

**प्रश्नः 9 अधोलिखितेषु पद्यांशद्वयं पठित्वा प्रश्नानाम् उत्तराणि संस्कृते लिखत — 10**

(1) पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः।।

(क) नद्यः स्वयमेव किं न पिबन्ति ?

(ख) वृक्षाः किं कुर्वन्ति ?

(ग) के सस्यं न अदन्ति ?

(घ) सतां प्रकृतिः कीदृशी भवति ?

(ङ) वारिवाहाः इति पदस्य कः अर्थः ?

(2) गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रवहन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः।।

(क) गुणाः केषु भवन्ति ?

(ख) गुणाः निर्गुणं प्राप्य के भवन्ति ?

(ग) नद्यः किं प्रवहन्ति ?

(घ) नद्याः जलं समुद्रमासाद्य कथं भवति ?

(ङ) प्राप्य इति पदे कः प्रत्ययः ?

**प्रश्नः 10 युग्ममेलनं कुरूत — 04**

| (अ) | | (ब) |
|---|---|---|
| (क) सरस्वती | — | तीरे |
| (ख) आम्रम् | — | समीरः |
| (ग) पवनः | — | वाणी |
| (घ) तटे | — | रसालः |

**प्रश्न 11 अधोलिखितानां शब्दानां विलोमशब्दं पाठात् चित्वा लिखत— — 04**

- पश्चाद् ...................................
- हसितुम् ......................................
- अधः ...................................
- सूर्यास्तः ....................................

**प्रश्नः 12 अधोलिखितप्रश्नानाम् उत्तराणि एकवाक्येन लिखत — 04**

1. निर्धनायाः वृद्धायाः दुहिता कीदृशी आसीत् ?
2. कालः कस्य रसं पिबति ?
3. जन्तवः केन तुष्यन्ति ?
4. बालः कदा क्रीडितुम् अगच्छत् ?

**प्रश्नः 13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कण्ठस्थीकृतं सुभाषितद्वयं लिखत—04**

**प्रश्नः 14 स्वस्य मित्रस्य कृते भगिन्याः पाणिगृहणसंस्कारम् आमन्त्रयितुम् एकं पत्रं संस्कृते लिखत— 04**

**प्रश्नः 15 अधोलिखितेषु पदयुग्मेषु विशेष्य–विशेषणपदं पृथक्–पृथक् चित्वा लिखत –** **05**

| | | विशेषणम् | विशेष्य |
|---|---|---|---|
| (क) खिन्नः बालः | – | ......................... | ..................... |
| (ख) पलायमानं श्वानम् | – | ....................... | ......................... |
| (ग) प्रीतः बालकः | – | ......................... | ........................... |
| (घ) स्वादूनि भक्ष्यकवलानि | – | ........................ | .......................... |
| )ङ) त्वरमाणाः वयस्याः | – | ....................... | .......................... |

**प्रश्नः 16 अधोलिखितानि वाक्यानि लोट्लकारे परिवर्तयत–** **05**

**यथा– सः पाठं पठतिं सः पाठं पठतु।**

(क) नद्यः आस्वाद्यतोयाः सन्ति। ................................................................

(ख) सः सदैव प्रियवाकयं वदति। ................................................................

(ग) त्वं परेषां प्रतिकूलानि न समाचरसि। ....................................................................

(घ) ते वृत्तं यत्नेन संरक्षन्ति। ..........................................................................

(ङ) अहं परोपकाराय कार्यं करोमि। .......................................................................

**प्रश्नः 17 अधोलिखित–मञ्जूषायाः सहायतया भावार्थे रिक्तस्थानानि पूरयत –** **05**

(गृहव्यवस्थायै, उत्पादयेत्, समर्थकः, धर्मयात्रायाः, मङ्गलकामनाम्, कल्याणकारिणः)

यदा चन्दनः स्वपत्न्या काशीविश्वनाथं प्रति.......................विषये जानाति तदा सः क्रोधितः न भवति यत् तस्याः पत्नी तं........................कथयित्वा सखीभिः सह भ्रमणाय गच्छति अपि तु तस्याः यात्रायाः कृते...................................कुर्वन् कथयति यत् तव मार्गाः शिवाः अर्थात्............................ भवन्तु। मार्गे काचिदपि बाधा तव कृते समस्यां न .....................। एतेन सिध्यति यत् चन्दनः नारीस्वतन्त्रतायाः .............................आसीत्।

**प्रश्नः 18 अधोलिखितेषु एकं विषयं स्वीकृत्य दशवाक्येषु सरल–संस्कृत–भाषायां निबन्धं लिखत–10**

(1) उद्यानम् (2) उत्सवः

(3) संस्कृतभाषायाः महत्त्वम् (4) विद्यालयः

.........................................+.............................................+...........................................+....................................